# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम्** - ६ (New) | **गुणाः** - ७० |
| **विषयः** - नव्यव्याकरणम् | **कोड- CC - 2.3.6** | **समयः** - २ तः ५ |
| **दिनाङ्कः** - १०/१२/२०१८ | **सन्दर्भग्रन्थः**- वैयाकरणसिद्धान्तकौमुदी महाभाष्यं च | |

---

**॥ प्रथमान्वितिः ॥**

**प्र-१ केषामपि पञ्चानां रूपाणां ससूत्रं सिद्धिः कार्या । १०**

१. कारकः
२. कोटकः
३. घातकः
४. जनार्दनः
५. लोलुवः
६. बुधः
७. ददः

**प्र-२ कयोः अपि द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या । १०**

१. अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ।
२. श्याद्व्यधास्रुसंस्रतीणवसावहृलिहश्लिषश्वसश्च ।
३. तुन्दशोकयोः परिमृजापनुदोः ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ कयोः अपि द्वयोः उत्तरे लेख्ये । १०**

१. 'नभस्वत्' इति रूपं छन्दसि कथं साधु भवति इति प्रतिपादयत ।
२. छन्दसि 'ऋक्वता' इति रूपं कथं साधु भवति इति प्रतिपादयत ।
३. 'सग्धिः' इत्यस्य रूपस्य छन्दसि साधुत्वं प्रतिपादयत ।

**प्र-४ कयोः अपि द्वयोः ग्रन्थपङ्क्त्योः अर्थं ससन्दर्भं सोदाहरणं च स्पष्टीकुरुत । १०**

१. यवाग्वाऽग्निहोत्रं जुहोति । अग्निहोत्रशब्दोऽत्र हविषि वर्तते ।
२. लिः इति च्लेः प्राचां संज्ञा । एभ्यः लेः लुक् स्यात् मन्त्रे । अक्षन्नमी मदन्त हि ।
३. इदं प्रत्याख्यातम् । इन्धेः छन्दोविषयत्वात् भुवः वुकः नित्यत्वात् ताभ्यां लिटः कित्-वचन-आनर्थक्यम् इति।

## ॥ तृतीयान्वितिः ॥

**प्र-५ कस्यापि एकस्य प्रश्नस्य उत्तरं लेख्यम् ।** **१०**

१. महाभाष्यानुसारं **कः शब्दः** इति बोधयत ।

२. शब्दानुशासनस्य मुख्यप्रयोजनानि कानि इति बोधयत ।

**प्र-६ कयोः अपि द्वयोः प्रश्नयोः उत्तरे लेख्ये ।** **१०**

१. **यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारकाले ।**
**सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥** इत्यस्य अर्थं भाष्यदिशा विवेचयत ।

२. **चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥** इति ऋक् भाष्यदिशा विवेचनीया ।

३. 'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सप्वायः सख्यानि जानते भद्रेषां लक्ष्मीर्निहिता अधिवाचि ॥' इति वेदपङ्क्तिं भाष्यदिशा व्याख्यात ।

## ॥ चतुर्थान्वितिः ॥

**प्र-७ केषामपि दशानां प्रश्नानाम् उत्तराणि एकैकवाक्यैः लिखत ।** **१०**

१. उशती इत्यस्य शब्दस्य कः अर्थः ?

२. तितउ इत्यस्य शब्दस्य कः अर्थः ?

३. प्रत्यभिवादे नाम्नः प्लुतिं के न विदुः ?

४. लोके पति-शब्दस्य तृतीया-एकवचनान्तं रूपं किं भवति ?

५. भ-संज्ञाविधायकं सूत्रं किम् ?

६. **नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्** इति वार्तिकेन वति-प्रत्यये परे नभसादीनां का संज्ञा भवति ?

७. **हरिभ्यां याह्योक आ** इत्यत्र किं क्रियापदम् ?

८. इन्ध-भू-धातुभ्यां परः अपित् लिट् कित्वत् केन सूत्रेण भवति ?

९. गामस्य तदहः सभायां दीव्येयुः इत्यत्र द्वितीया केन सूत्रेण प्राप्नोति ?

१०. वु इत्यस्य स्थाने कः आदेशः भवति ?

११. नन्द्यादिधातुभ्यः कः प्रत्ययः क्रियते ?

१२. विषमस्थः इत्यत्र क-प्रत्ययः केन सूत्रेण भवति ?

१३. अंशहरः इत्यत्र कः प्रत्ययः वर्तते ?

१४. भिक्षाचरः इत्यत्र कः प्रत्ययः ?

१५. जनमेजयः इत्यस्य विग्रहः कः ?